दिनाङ्क :- 30.08.2026 प्रात: - 06:55

## अथवार्ता:

### प्रधानमन्त्री - उज्बेकिस्तान

प्रधानमन्त्री नरेन्द्रमोदी अद्य उज्बेकिस्तानदेशस्य राष्ट्रपतिना शावकत मिर्जियोयेव् इत्यनेन सह द्वैपाक्षिकं वार्तालापं करिष्यति। उभौ नेतारौ राष्ट्रपति-प्रासादे व्यापार-निवेशः, रक्षा, डिजिटल-सम्पर्कः, ऊर्जा, शिक्षा, जनानां सम्बन्धादिषु क्षेत्रेषु सहकारस्य समीक्षां करिष्यतः। अद्य प्रधानमन्त्री नरेन्द्रमोदी सर्वप्रथमं उज्बेकिस्तानस्य योगसङ्घेन आयोजिते योगकार्यक्रमे भागं ग्रहीष्यति ततः परं सः उज्बेकिस्तानस्य राष्ट्रपतिना शावकत मिर्जियोयेव इत्यस्य प्रासादं गमिष्यति यत्र उभौ द्वैपाक्षिकोपवेशने भागं ग्रहीष्यतः।

--------------------------------------------

### नेपाल-जलाप्लाव:

बुधवासरे आगताया: आकस्मिकजलाप्लावन-दुर्घटनायाः अनन्तरं नेपालदेशे अद्यपर्यन्तं अष्टोत्तरैकशतं यावत् भारतीयाः नागरिकाः रक्षिताः इति विदेशमन्त्रालयः अवदत्। सामाजिकान्तर्जालीये पटले विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत् पूर्वं सम्पर्करहितैः प्रायः पञ्चाशत् भारतीयैः सह पुनः सम्पर्कः स्थापितः। मन्त्रालयः अवदत् यत् पञ्चसप्तत्यधिक द्विशतं यावत् भारतीयाः नागरिकाः लुप्ताः इति कथ्यते, भारतीय-मूलस्य प्रायः अष्टाविंशत्यधिकैकशतं यावत् जनाः अपि लुप्ताः सन्ति। स्थानीयप्रशासनस्य अनुसारं, गतदिनेषु चीनदेशात् अष्टनवत्यधिक पञ्चशतं यावत् भारतीयाः नागरिकाः नेपालदेशम् आगतवन्तः। अत्रान्तरे चीनदेशात् अद्यापि निर्गन्तुम् नवशतं भारतीयाः नागरिकाः सुरक्षिताः सन्ति, बीजिङ्ग्-नगरे भारतीय-दूतावासः प्रत्यक्षतया अथवा स्थानीय-प्रशासनस्य माध्यमेन तैः सह सम्पर्करत: अस्ति। मन्त्रालयः अग्रे अवदत् यत् भारतसर्वकारः जलाप्लावनेन पीडितानां शीघ्ररक्षणार्थं, साहाय्यार्थं च नेपाली-चीन-अधिकारिभिः सह निकटसमन्वयेन कार्यं कुर्वन् अस्ति। विदेशमन्त्रालये चतुर्विंशति-होरा नियन्त्रण-कक्षः स्थापितः अस्ति तथा च काठमाण्डू-बेजिङ्ग्-नगरयोः भारतीय-दूतावासयोः सहायिका-सेवाः प्रचलन्ति। अत्रान्तरे, विदेश-मन्त्री डा. एस्.

जयशङ्करः अवदत् यत्, एकादश टन्-भारयुक्तेन चतुर्थं विमानम्, सी130जे हर्क्युलिस् इति, अद्य काठमाण्डू-नगरं प्रति प्रस्थितम्।

---------------------------------------------

## प्रधानमन्त्री 'मन की बात' कार्यक्रमः

प्रधानमन्त्री नरेन्द्र मोदी अद्य प्रातः एकादशवादने आकाशवाणीतः 'मन की बात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति । मासिकस्य अस्य आकाशवाणी-कार्यक्रमस्य एतत् सप्तत्रिंशोत्तरैक-शत-तमं संस्करणं भविष्यति। आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनीभिः अस्य कार्यक्रमस्य प्रसारणं भविष्यति। अयं हि कार्यक्रमः आकाशवाणी-वार्ता-विभागस्य अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अपि च newsonair इति चल-दूरभाषीये तन्त्रांशे अपि उपलब्धः भविष्यति। आकाशवाणी-दूरदर्शनवार्ता-प्रधानमन्त्री-कार्यालय-सूचना-प्रसारण-कार्यालयानां यू-ट्यूब वाहिनीभिः अपि अस्य कार्यक्रमस्य साक्षात् प्रसारणं भविष्यति। हिन्दी-भाषायां प्रसारणस्य पश्चात् अस्य प्रसारणम् आकाशवाण्या क्षेत्रीयासु भाषासु अपि भविष्यति।

---------------------------------------------

## ऋतुविभाग:

भारत-ऋतु-विभागेन आगामि-दिनद्वयोः ओडिशा-राज्ये अति वृष्टयै रक्त-वर्णीया सञ्चेतना प्रसारिता। अद्य अरुणाचलप्रदेशस्य, असम्-राज्यस्य, मेघालयस्य, छत्तीसगढस्य, गाङ्गेय पश्चिमबङ्गालस्य च केषुचित् स्थानेषु अपि प्रचण्डवृष्टिः भविष्यति इति ऋतुविभागः पूर्वानुमानं प्रकटितवान्। अद्य बिहार, पूर्वीमध्यप्रदेश, पूर्वीउत्तरप्रदेश, झारखण्ड, नागालैण्ड, मणिपुर, मिजोरम, त्रिपुरा, उपहिमालयीय पश्चिमबङ्गाल, सिक्किम, उत्तराखण्ड, विदर्भ-इत्येतेषु स्थानेषु अपि अतिवृष्टेः सम्भावना अस्ति।

---------------------------------------------

## क्रिकेट

महिला-क्रिकेट्-क्रीडायां, भारतम् अद्य दुबई-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडाङ्गणे थाईलैण्ड्-देशस्य विरुद्धं स्वस्य विंशतिं प्रति विंशति एशिया-कप-इत्यभियानस्य आरम्भं करिष्यति। भारतीयसमयानुसारम् सायं सार्द्ध अष्टवादने क्रीडायाः आरम्भः भविष्यति।

---------------------------------------------

संस्कृत - साप्ताहिकी

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादनतः भविष्यति, भवन्तः सर्वे श्रोतुं प्रभवन्ति।

।। इति वार्ता:।।